# .. ashvinIkumArastotram ..

# ॥ અશ્વિનીકુમારસ્તોત્રમ્ ॥

## Document Information

Text title : ashvinIkumArastotram
File name : ashvinIkumArastotram.itx
Location : doc_deities_misc
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Nat Natarajan nat.natarajan at gmail.com
Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA
Description-comments : From Brihatstotraratnakara with 408 stotras
Source : mahAbhArata Adiparva
Latest update : June 5, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ અશ્વિનીકુમારસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ।
પ્રપૂર્વગૌ પૂર્વજૌ ચિત્રભાનૂ ગિરા વાં શંસામિ તપસા હ્યનન્તૌ ।
દિવ્યૌ સુપર્ણૌ વિરજૌ વિમાનાવધિક્ષિપન્તૌ ભુવનાનિ વિશ્વા ॥ ૧॥

હિરણ્મયૌ શકુની સામ્પરાયૌ નાસત્યદસ્રૌ સુનસૌ વૈજયન્તી ।
શુક્લં વયન્તૌ તરસા સુવેમાવધિવ્યયન્તાવસિતં વિવસ્વતઃ ॥ ૨॥

ગ્રસ્તાં સુપર્ણસ્ય બલેન વર્તિકામમુઞ્ચતાવશ્વિનૌ સૌભગાય ।
તાવત્સુવૃત્તા વનમન્તમાયયાવસત્તમા ગા અરુણા ઉદાવહત્ ॥ ૩ ॥

ષષ્ટિશ્ચ ગાવસ્ત્રિશતાશ્ચ ધેનવ એકં વત્સં સુવતે તં દુહન્તિ ।
નાનાગોષ્ઠા વિહિતા એકદોહનાસ્તાવશ્વિનો દુહતો ધર્મમુક્થ્યમ્ ॥ ૪॥

એકાં નાભિ સપ્તશતા અરાઃ શ્રિતાઃ પ્રધિષ્વન્યા વિંશતિરર્પિતા અરાઃ ।
અનેમિચક્રં પરિવર્તતેઽજરં  માયાશ્વિનૌ સમનક્તિ ચર્ષણી ॥ ૫॥

એકં ચક્રં વર્તતે દ્વાદશારં ષણ્ણાભિમેકાક્ષમમૃતસ્ય ધારણમ્ ।
યસ્મિન્દેવા અધિવિશ્વે વિષક્તાસ્તાવશ્વિનૌ મુઞ્ચતો મા વિષીદતમ્ ॥ ૬॥

આશ્વિનાવિન્દુમમૃતં વૃત્તભૂયૌ તિરોધત્તામશ્વિનૌ દાસપત્ની ।
હિત્વા ગિરિમશ્વિનૌ ગામુદાચરન્તૌ તદ્વૃષ્ટિમહ્નાત્પ્રથિતૌ બલસ્ય ॥ ૭॥

યુવાં દિશો જનયથો દશાગ્રે સમાનં મૂર્ધ્નિ રથયાનં વિયન્તિ ।
તાસાં યાતમૃષયોઽનુપ્રયાન્તિ દેવા મનુષ્યાઃ ક્ષિતિમાચરન્તિ ॥ ૮॥

યુવાં વર્ણાન્વિકુરુથો વિશ્વરૂપાંસ્તેઽધિક્ષિયન્તે ભુવનાનિ વિશ્વા ।
તે ભાનવોઽપ્યનુસૃતાશ્ચરન્તિ દેવા મનુષ્યાઃ ક્ષિતિમાચરન્તિ ॥ ૯॥

તૌ નાસત્યાવશ્વિનૌ વાં મહેઽહં સ્રજં ચ યાં બિભૃથઃ પુષ્કરસ્ય ।
તૌ નાસત્યાવમૃતાવૃતાવૃધાવૃતે દેવાસ્તત્પ્રમદે ન સૂતે ॥ ૧૦॥

મુખેન ગર્ભં લભતાં યુવાનૌ ગતાસુરેતત્પ્રપદેન સૂતે ।
સદ્યો જાતો માતરમત્તિ ગર્ભસ્તાવશ્વિનૌ મુઞ્ચથો જીવસે ગામ્ ॥ ૧૧॥

સ્તોતું ન શક્નોમિ ગુણૈર્ભવન્તૌ ચક્ષુર્વિહીનઃ પથિ સમ્પ્રમોહઃ ।
દુર્ગેઽહમસ્મિન્પતિતોઽસ્મિ કૂપે યુવાં શરણ્યૌ શરણં પ્રપદ્યે ॥ ૧૨॥

ઇતિ શ્રીમન્મહાભારત આદિપર્વણ્યશ્વિનીકુમારસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

.. ashvinIkumArastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*